दुस्त्याज्यमन्तर्हितदुष्टबन्धनं
तद्दुस्पृहादुर्वचनानुबन्धनम् ॥ ३ ॥

॥ मनसोऽपि मूलं बीजमतः कामः ॥

॥ अभिन्नार्थे तदङ्गमन्त्र वर्णः ॥

(॥ कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ॥
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥
प्रजापतिः ऋक्.मं. १०१)

१६५ ॥ कामः स रेतो मनसोऽपि-मूलं
सूक्ष्मं ह्यविद्या परकं समूलम् ॥
तेनैव पूर्वं ह्यसति ~~[illegible]~~ प्रपन्नं
सतोऽनुबन्धं हृदयेऽन्वविन्दन् ॥ ६५

१६७ ॥ साहस्मने सेव भवे पराविद्या
मूलाच्च ~~[illegible]~~ऽप्युभयाऽप्यविद्या ॥
तद्वासनाऽन्तर्हित ~~बी~~ बीजमूलं
स्वान्तं मनोऽन्तःकरणं तु तूलम् ॥ ६७॥

१६८ ॥ तद्वासनाया हृदि संस्पृहायाः
स्वात्मन्यविद्याऽऽहितान्तर मूर्ति कायाः ॥
निर्मूलनेनैव हि देवताऽलं
प्राप्यं हि मर्शितं ~~[illegible]~~ निवृत्ति सत्त्वम् ॥६८॥

१९९ नसत्यंहि देव त्वत्कृते ऽन्नकारणं
हि आत्मभावादमृतत्वसाधनम् ।
अज्ञानमेवात्मनि सत्परायणं
धीयोगतः सिध्यति हृत्प्रसादनम् ॥ ७ ॥

२०० ग्रं मतद्वारस्तन्यामूलमनुबद्धगन्धं
हृद्भावनामानसमूलगन्धम् ।
वियोगतस्तेऽत्र भवः समस्तं
व्यवारयंस्ते तपसा स्व· ~~[illegible]~~ संस्थम् ॥ ८ ॥

२०१ ॥ देव त्वमायुर्भुवि तेजसाऽऽपूर्णं
तत्सोमपानाद्दिवि चामृतान्नम् ।
स्वेन्द्रेण सख्यं परमामृतत्वं
प्रापुः ~~त्वं~~ स्वयं स्वाभिविदित्य सत्त्वम् ॥ ९ ॥

२०२ ॥ प्राणात्मनां तन्मरुतां निकामर्द्धिजां
प्रत्यग्निवाचामनसा पितृति त्रिधाम ॥
प्रापुस्त्रयस्ते क्रमशः परात्मतां –
स्वेन्द्रेण युक्ताः परमामृतात्मताम् ॥ १० ॥

૨૦૩ "સંવિદ્યુયો મત તદા ક્રિયયા ~~[illegible]~~ સમં
ન મુંચતી હ્રીડયમન્તનમશ્નુતે "
સાહિત્યયાઽઽઽમોઽભ્યન્તં સંવિન્દતે
ન સોઽશ્નવાપ્ત સ્વયમેવ મુચ્યતે ॥ ૨૨ ॥

---

૨૦૪ " પૂર્ણાત્મતત્ત્વં પરમં સદાઽઽશ્રયે
બ્રહ્મૈવ સત્યં પ્રથિતં તદદ્વયમ્ ॥
શ્રેયઃ પુનિઃ શ્રેયસ કૃત સમુચ્ચયં
તદક્ષરં બ્રહ્મ સદૈકં મદ્વયમ્ ॥ ૨૪

હૃદ્ગ્રન્થિભેદેન મોક્ષે મૂલં સાધનમ્ ॥

" આહારશુદ્ધૌ સત્ત્વશુદ્ધિઃ સત્ત્વશુદ્ધૌ ધ્રુવા સ્મૃતિઃ
સ્મૃતિપ્રતિલમ્ભે સર્વગ્રન્થીનાં વિપ્રમોક્ષઃ ॥ (છાં. ૭)

---

૨૦૫ " આહારશુદ્ધૌ હૃદિ સત્ત્વશુદ્ધિઃ
ધ્રુવા સ્મૃતિઃ સાઽઽત્મનિ સત્ત્વશુદ્ધૌ ॥
સ્મૃતેઃ પુનાત્મેવ કૃતેશ્વસાક્ષાત્
હૃદ્ગ્રન્થિભેદાદિહ વિપ્રમોક્ષઃ ॥ ૨૬ ॥

---

२०६ ॥ मोक्षः स ~~आ~~ सत्यात्मनि नित्यसिद्धः
आज्ञान संस्कार्य इति प्रसिद्धः ॥
~~स्नानोऽपि कार्य~~
नाद्य क्रियादेरविकार्य इष्टः
अवेदवाच्या विदितो विमृष्टः ॥ १४ ॥

—

२०७ मनोऽस्याप्यथवे इष्टिनित्यसिद्धः
अलौकिकार्थोऽस्ति सदा समृद्धः ॥
नो प्राप्य आत्मैव स दाऽयमात्मः
स्वात्मस्वरूपः परचेतनात्मः ॥ १५ ॥

—

२०८ ॥ स्वात्मस्वरूपोऽप्यनोऽस्य सत्ता
सोऽयं प्रबोधात स्वचिताऽनादिष्टः ॥
सर्वाद्यधिष्ठानकालेन्दु रिष्टः
स्वानन्द सत्त्वादि परायणेष्टः ॥ १६ ॥

—

॥ અથ અક્ષરીકલા ॥

॥ મનુષ્યગન્ધે દૈવતતો વિશિષ્ટો વિશેષ્યં તત્ત્વમ્ ॥

૨૨૫- "ચિદાત્મનોઽન્ત હૃદયેઽવશિષ્ટા
સદ્ભાવના માનસચિદ્વિશિષ્ટા ॥
સા મૂલબીજાત્મક વાસનેષ્ટા
સ્યાત્ મૂલવેદોપનિબદ્ધ શિષ્ટા ॥ ૧ ॥

૨૨૬ " સન્મૂલ સદ્ભાસન સાચિદાત્મા ॥
સન્માનસોઽન્ત હૃદિ સમ્પ્રવિષ્ટઃ ॥
સા જન્મદ સોર્જુ વિ સર્વ ભુક્ત્યૈ
સદ્ભાસના સ્યાદ્ વિષયાદ્ વિમુક્ત્યૈ ॥ ૨ ॥

૨૨૭- " સા વાસનૈવાત્ર મનુષ્યગન્ધઃ
તસ્યૈવ યોગેન શરીરગન્ધઃ ॥
સંસારબન્ધઃ સકલાનુબન્ધઃ"
મનોઽનુબન્ધેન ત્રયાનુબન્ધઃ ॥ ૩ ॥

228 ॥ તસ્માદ્ વિલોકેન હિમાનવાનાં
દેવ ત્રાસિધ્ધિશ્ચ સુવાસનાનામ્ ॥
મ્ સો વિમોકાર્થં મવાસનાનાં
દિશાત્ તત્ત્વં તદ માનવાનામ્ ॥ ૪ ॥

229 ॥ તસ્યાનુભાવાય સતામ્ મૂર્ખાણાં
મૂર્ખસ્તપઃ સંયતતામ્ બીણામ્ ॥
મનુષ્યગન્ધસ્ય નિવારણાર્થં
તન્મન્ત્રા યેગોઽયમિહ ત્ર્યાણામ્ ૫ ॥
તન્મન્ત્રસ્ય રહસ્યાર્થઃ (યેભ્યો માતા)

230 ॥ યેભ્યો માતા મધુમત્પિન્વતે પયઃ
પીયૂષં દ્યૌરદિતિ રદ્રિબર્હાઃ ॥
ઉક્થશુષ્માન્ વૃષભરાન્ સ્વપ્નસ્તાન્
આદિત્યાઁ અનુમદા સ્વસ્તયે ॥
(ઋક્ મં)

230 ॥ યેભ્યો નિજૈભ્યો ભુવિ માનવેભ્યઃ
સમસ્તો મદ્ધ્યા દિવિ દેવ તેભ્યઃ ॥
માતા મહી સા મધુમત્ પયઃ સ્વં
દદાતિ ભાત્રી મધુ વિદ્યયાઽઽસમ્ ॥ ૬ ॥

२३१ " पीयूषमाद्यं प्रार्थितं प्रख्यानं
दिव्याऽदितिः सा वितताऽत्यखण्डा ।
द्यौरद्रिबर्हाः परमं पवित्रं
यत्रेप्सिता ऽऽखण्डलवैद्युताऽद्य ॥ ७ ॥
उत्तरार्चिक्याम् ॥

~~२३२~~ " उक्थशुभान् वृषभरान् स्वप्नसस्तान्
आदित्याँ अनुमदा स्वस्तये ॥
२

२३२ " तान् वक्ष्यशुभान् परवाग्बलिष्ठान्
वृष्टिप्रकृष्टान् वरधिद्गरिष्ठान् ।
सुकर्मणोऽष्टानदितेः सुपुत्रान्
तान् स्वस्तये चानु मद प्रहृष्टान् ॥ ८ ॥
॥ द्वितीयो मन्त्रः ॥

~~२४~~ " २

" त्वा पित्रे विश्वदेवाय वृष्णे
यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो
वयं स्याम पतयो रयीणाम् ॥

२ (ऋक्")

२३३ ॥ ध्यानं हि पित्रे जगतां सवित्रे
तद्धिम्नदेवाय सते सुवर्णे।॥
यत्नैर्नियोगमजाप्रिता सनिष्ठैः
योगात्मं ~~ध्यायोग~~ सत्वैः करणैः ~~सुकर्मा~~ हि विनिर्दिष्टय ९॥

~

२३४ ॥ बृहस्पते ब्रह्मणि वीरवर्षैः
ते सुप्रजाः स्याम सदाऽमृतेषु ॥
ब्रह्मन्नवयं ते व्रतयोरपीणं॥
नित्यं भवामोऽध्यनरवाववशिष्ठाः॥ १०॥

~

२३५ ॥ ज्ञातेन मन्त्राद्धितयेन योगात
स सं हि देव त्वमसि प्रपन्नाः॥
सत्सोमपानाय सर्वे ~~सम~~ प्रति धदाः
युक्तास्त्रयस्ते त्रिभवः समृद्धाः॥ ११॥

~

२३६ प्रापुः पुनस्ते दिवि देव पङ्क्तिं
यद्योतिभाजः प्रकृतिप्रदीप्ताः॥
सखोऽनुजग्मुः सवितुः समीपे
हिमानु भानाय करं प्रतीपम्॥ १२

૨૩૭ " ગાયત્રિ વાચોઽધિષ્ઠિતા સવિત્રા
પ્રાણાત્મના તે તપસ્યા પવિત્રાઃ"
તદ્દેવપઙ્ક્તૌ સહસો પવિષ્ઠાઃ
પૂર્ણાં નજાનુ નિજભાવશિષ્ઠાઃ॥ ૧૩॥

—

૨૩૮ " સાવિત્રસદ્દેવતસત્ત્વશિલ્પં
તત્સોમપાત્રં મનસં વિશિષ્ટમ્"
રાકેપુનશ્ચક્રુરદશ્ચયસ્મિ
મુક્ત્યૈ વિભક્તં પ્રબભૌ વિચિત્રમ્" ૧૪"

—

૨૩૯ "પ્રજાપતિસ્તં સવિતારમૂચે
ગુહ્યં વચસ્તાન્મનસૈવ વાચ્યમ્"
ત્વમેવ પૂર્વં પિતૃ. સોમમેતૈઃ
તથૈવ સધો મનસા સહૈતૌઃ" ૧૫"

—

૨૪૦ પ્રજાપતિં સ્વં સવિતા સુભાવાત્
તં પ્રત્યુવાચ પ્રકૃતાં સુવાચમ્"
આદૌ તથાન્તેઽપિ ચ દિવ્યસોમં ॥ ૧૬॥
ત્વમેવમેઽસ્યેન પિબેતેષુ સામ્રાજ્યપ(ગૌપ્યાવૃપ

૨૪૧ " પ્્રજાપતિસ્તત્ર પપૌ સ્વમિષ્ટં
સોમં તથૈવોઽજયતોઽવિશિષ્ટમ્ "
તતસ્ત્રિભિસ્તૈઃ સવિતા પપૌ સન્
સમાનભાવેન તતોઽવશિષ્ટમ્ ॥૨૭॥

૨૪૨ " તસ્સોમપાનાદ્ ભવન્ત્રયસ્તે
દિવાકૃતત્ત્વ પરમાયુરાપ્તાન ॥
તેનૈવ તે દેવગણે પ્રવિષ્ટાઃ
તે દેવતાત્માન ઇતિ પ્રશિષ્ટાઃ ॥૨૮॥

॥ સોમરસસ્ય ઉભયાર્થે વા ॥
॥ તત્રાયં ઋક્ મન્ત્રવર્ણઃ ॥
॥ સોમં મન્યતે પપિવાન્ યત્સંપિષન્ત્યોષધિમ્ ॥
સોમં યં બ્રહ્માણો વિદુર્ન તસ્યાશ્નાતિ કશ્ચન ॥
(ઋગ્.)

વૈદિક પ્રતિઓ(ઘૂ) મેઘાસવ ૨
સં. વૈધાનિક યજનાયનવહઃ ૧૩

૨૪૩ " તત્રાપિ ગુંસંહિ વિશિષ્ટ તત્ત્વં
સોમે રસાન્નન્યાપિ દિવ્યસત્ત્વમ્ ॥
તમોપહં પાર્થિવ સદ્રસં તં
સંયોજયન્ત્યત્ર ચ દૈવયજ્ઞે ॥ ૧૩ ॥

सोमरसस्य आनन्त्यं विशिष्टार्थवाय

२४५ य यं ब्राह्मणा वेदविदो विदन्ति
तं संविदानन्दरसं वदन्ति।
न तं समश्नाति हि कश्चनेति
श्रुतं हि वेदोपनिषत्सु चेत्थम्॥ २१॥

२४६ ॥ येनामृतत्वं परमं ~~विशिष्टं~~ स्वनिष्ठं
प्रापुस्त्वायस्ते ऋभवो विशिष्टम्॥
सत्यात्मकं संविदुपावशिष्टं
साक्षात्कृतात्मन्यवलोकशिष्टम्॥ २२

२४७ ॥ चिद्देवतेन्द्रेण चिदेकसत्त्वना।
सत्सार्वभौमेन सता परात्मना॥
तं सोमपानेन सहैकसत्त्वना
सत्सोमरस्येन सजूरसात्मना॥ २३।

॥ ऋभवः २ इन्द्रवन्तः॥

२४८ ॥ तेनेन्द्रवन्तः प्रभुस्त्वायस्ते
तदैव सयोगतः ऋभवः समस्ते च
पश्चात् सोमस्याश्च सु सोमपेय हे
सोमैः समिद्ध्याः श्रुतिभिः समिद्धाः॥ २४

१+

२४८ ॥ समभ्यस्यन्ते तं पवित्रास्त सोमं
पिबन्ति यत सोमरसं प्रसिद्धम्
तमेव प्राचिं पार्थिव सद्रसं तं
संस्थोजयन्त्यन्नाय देवयशेन २०

॥ ऋभुक्षान इन्द्रः ॥

२४९ ॥ सेन्द्रो विभौ स्वन ऋभुमान् प्रसिद्धः
निरोऽनुयोगेन तथा सुसिद्धः ॥
सत्येन सत्त्वेन समौ समर्थौ
सर्वाधिकारौ श्रुतिमन्त्रसिद्धौ ॥ २५॥

तयोः स्मृत्योः प्रमाद्वेन प्रबोधने पदे
सत्येन जागृति सत्त्वयोगः ॥

। तेन सत्येन जागृत मधि प्रचेतुने पदे ॥
इन्द्राग्नी तस्य बोधतम् ॥
(मेधातिथिः ऋ. १। १)

૩૫૦ ॥ જાગર્તિ સસેનશ્ચૈ વાઙ્‌મુખેન
સેન્દ્રસ્તથાઽગ્નિશ્ચ વિદેક સત્ત્વૌ॥
પ્રચેતનેઽગ્રે પરમે પદે સ્વે
તસ્યાવતોધેન પરાક્રમ સત્ત્વે ॥૨૬॥

॥ તયોર્યોગે ઋઙ્‌મન્ત્રાવર્ણાઃ ॥
॥ અહં ચ ત્વં ચ વૃત્રહન્ સંયુજ્યાવ સનિભ્ય આ ॥
અરાતીવા ચિદદ્રિવો ભદ્રા ઇન્દ્રસ્ય રાતયઃ ॥
(ઋક્.મં.)

૩૫૧- ॥ અહં તથા ત્વં ચ સમૈત્યયજ્ઞાત
યુજ્યાવ સર્વાભિગુણૈકયોગાત ॥
ઇન્દ્રસ્યદાનાનિ સમન્વિતાનિ
ભદ્રાણિ ભૂયસ્ત્વગુણાન્વિતાનિ ॥૨૭॥

॥ ઇન્દ્રો મરુત્વાન્ ઇન્દ્રવન્તો મરુતઃ ॥
(૧) ॥ મરુત્વાઁ ઇન્દ્ર વૃષભો રણાય ॥ - ઋક્
(૨) મરુત ઇન્દ્રવન્તાઃ ॥ (ઋક્
(૩) ॥ વાયુઃ સહ સેન્દ્રવાન્ સમવયનઃ ॥ (છન્દો
(૪) ઇન્દ્રો મરુત્વાન્ સમવયમાત્ર છન્દો.

---

૨૫૨ "ઇન્દ્રો મરુત્વાનિતિ સંસ્તુતોઽપિ
તેઽપીન્દ્રવન્તો મરુતઃ પ્રકીર્ત્યાઃ
સિદ્ધસ્તથેન્દ્રોઽપ્યૃભુમાન્ સમિદ્ધઃ
તથૈવ પુનસ્તે ત્વૃભુરિન્દ્રવન્તઃ ॥ ૨૮ ॥
૨

ક નીરૂપો વાયુઃ ॥

(૧) " ત્રયઃ કેશિનાં ધ્રાજિરેકસ્ય દદૃશે ન રૂપમ્
(દીર્ઘતમાઃ ઋક્. ૧.૧૬૪.૪૪)

(૨) " આત્મા દેવાનાં — ઘોષા ઇદસ્ય શૃણ્વિરે
ન રૂપં તસ્મૈ વાતાય હવિષા વિધેમ"
(ઋક્. ૧૦

ગમ્યતે
નીરૂપોઽપિ વાયુઃ ઇન્દ્રયોગેન દર્શિતઃ

(૩) " ઇન્દ્રેણ સં હિ દૃક્ષસે સંજગ્માનો અબિભ્યુષા
મન્દૂ સમાનવર્ચસા (ઋક્. ૧
૨

૨૫૩ " વાયુસ્તુ નીરૂપ ઇહ પ્રશસ્યઃ
સેન્દ્રેણ સન્દૃશ્યતે ઇત્યપીહ ॥
દ્વૌ વૌ સમાનૌ સમવર્ચસૌ સ્તઃ
સમાન ઇન્દ્રૌ સમસત્ત્વકૌ સ્તઃ ॥ ૨૯ ॥
૨

૧૫

॥ તેનૈવ વાયુ દર્શિનો સઃ પશ્યતોપિ સ્થિતઃ ॥

॥ વાયવાયાહિ દર્શત ॥ (ઋક્.૧।૨।૧)

૨

૨૫૪ ॥ તેનૈવ વાયુઃ સચ દર્શિનોયઃ
સસોમપાનાય ઋચા સમાહુતઃ ॥
તાવિન્દ્રવાયૂ સહસઙ્ગતૌ સ્તઃ
સ્યાતાં દ્વિદૈવ સપદૌ સમસ્તૌ ॥ ૩૦ ॥

૨

॥ વેદે સાઙ્કેતિક સઙ્ગ્યા નિર્દિષ્ટૌ દ્વૌ તૌ સખૌ
જીવેશાખ્યાનૌ મતતઃ ॥

॥ દ્વા સુપર્ણા સયુજા સખાયા સમાનં વૃક્ષં પરિષસ્વજાતે ।
તયોરન્યઃ પિપ્પલં સ્વાદ્વત્તિ અનશ્નન્નન્યો અભિચાકશીતિ ॥
(દીર્ઘતમાઃ ઋક્.૧।૧૬૪।)

૨ હૃદિ ~~[illegible]~~ માત્ર તેન્દ્રૌ

૨૫૫ ॥ જીવેશસખ્યૌ ~~[illegible]~~ન્દ્રઃ
દ્વૌ તૌ સુપર્ણૌ સયુજૌ સખાયૌ
તથા ઋભુર્માનવ દેવતાત્મા
સેન્દ્રઃ સ્વયં દૈવત સાર્વભૌમઃ ॥ ૩૧ ॥

૨

તૌ " દ્રુમાવપિ સમાનૌ સોમપાન સ્વામિકૌ ॥
અભિન્નશ્ચૈ ઔપાન પદો શ્લોકઃ ॥ ~~ન્ત્રવર્ણઃ~~ ॥

"ઋતં પિબન્તૌ સુકૃતસ્ય લોકે
ગુહાં પ્રવિષ્ટૌ પરમે પરાર્ધે ॥
છાયાતપૌ બ્રહ્મવિદો વદન્તિ
પઞ્ચાગ્નયો યે ચ ત્રિણાચિકેતાઃ ॥
ગુહાં પ્રવિષ્ટાવાત્માનૌ હિ તદ્દર્શનાત (કઠોપ. ૩.૧)

૧૫૯ " ઋતં પરં સોમરસં પિબન્તૌ
સર્વાન્તરસ્થૌ ચ વિદાત્મકૌ તૌ ॥
છાયાતપાખ્યાવનુરૂપ સત્ત્વૌ
દ્વૌ તૌ સમસ્તૌ ચ નિરૂપસત્ત્વૌ તૌ ॥

॥ ઇતિ અષ્ટમીકલા સમ્પૂર્ણા ॥ ૮ ॥
॥ અન્ત્યાયમુ (માન્તિમઃ) પસંહારશ્લોકઃ ॥
॥ માનવઃ સ્વયં દ્રષ્ટુઃ સદેવતાત્મકોઽમૃત
મન્યતાં પરાભૂત ક સત્ત્વકઃ સદિન્દ્રવાન્ ॥
દેવવેન્દ્રસાર્વભૌમવાગ્ન્યાયસ્થવિદાત્મવાન
દેવરાજ હાર્દિસત્ત્વકોઽભૂત તાત્ત્વ સત્ત્વવાન્ ॥
॥ ૮૮ ॥

॥ ई ॐ श्रीः ॥

"ॐ भद्रं नो अपि वातय मनः॥

॥ वैदिक ऋभुदेवतासूक्तानां सङ्ग्रह सूची ॥

(१) प्रथमं ऋभुदेवतासूक्तम्

मेधातिथिः काण्वः॥ (ऋक्. सं. मं. १। २०।१-८)

"अग्निं द्वादश मेधातिथिः०" "अयमकारविदः०"

१ "अयं देवाय जन्मने०- (पत्रे·

(२) द्वितीयं आर्भवं सूक्तम् ॥

कुत्सः आङ्गिरसः॥ ऋक्. मं. १। ११०।१-९

"ततं नावामिवं तु०-

२ ततं मे अपस्तदु तायते पुनः०- पत्रे·

१७
५

(३) तृतीयं आर्भवं सूक्तम् ॥

कुत्सः आंगिरसः· ऋक्. मं. १।१११।१-५

"तक्षन् पश्यान्त्या त्रिवृत्० ॥ २२

३ तक्षन् रथं सुवृतं विद्मनापसः०० पत्रे·

२

(४) ॥ चतुर्थं आर्भवं सूक्तम् ॥ २२

॥ दीर्घतमाः मामतेयः औचथ्यः ॥ (ऋ. १।१६१।१-१४)

" किमु श्रेष्ठः षळूना ऽऽर्भवं त्रिकु बन्तम् ॥ ३६

४ किमु श्रेष्ठः किं यविष्ठो न आजगन्० ७

२

(पन्ने॰

(५) पञ्चमं आर्भवं सूक्तम् ॥

॥ विश्वामित्रः गाथेयः ॥ (ऋ. ३।६०।१-७)

४३

५ इहेह वो मनसा बन्धुता नरः॰ पन्ने २१

२

(६) षष्ठं आर्भवं सूक्तम् ॥

॥ वामदेवो गौतमः ॥ ऋ. ४।३३।१-११

६ (प्र ऋभुभ्यो दूतमिव वाचमिष्ये॰- (पन्ने ५४

+ " प्र ऋभुभ्य एकादशार्भवं वै॰

२

(७) सप्तमं आर्भवं सूक्तम् (ऋक् ४।३४।१-११

७ ऋभुर्विभ्वा वाज इन्द्रो नो अच्छ॰ (पन्ने

(८) अष्टमं आर्भवं सूक्तम् ॥ ऋ. ४।३५।१-९ ११

८ इहोप यात शवसो नपातः॰ (पन्ने॰ ५४

११

६५

२

॥ ई ॐ श्रीः ॥

॥ ऋभुदेवतासूक्तानि ॥

॥ अथ (१) प्रथमं ऋभुदेवताकं सूक्तम्

(सर्वानु. सूत्रम्: अग्निं द्वादश मेधातिथिः · ऋक्. १।१२।१

॥ अयमष्टावार्भवम्० (ऋक्. १।२०।१-८) छन्दः॥

मेधातिथिः काण्वः ऋषिः। ऋभवो देवता। गायत्री -

१ ॥ अयं देवाय जन्मने स्तोमो विप्रेभिरासया ॥

अकारि रत्नधातमः ॥ १ ॥

२ य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी ॥

शमीभिर्यज्ञमाशत ॥ २ ॥

३ तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम् ॥

तक्षन्धेनुं सबर्दुघाम् ॥ ३ ॥

४ युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः ॥

ऋभवो विष्ट्यक्रत ॥ ४ ॥

५ सं वो मदासो अग्मतेन्द्रेण च मरुत्वता ॥

आदित्येभिश्च राजभिः ॥ ५ ॥

६ उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम् ॥

अकर्त चतुरः पुनः ॥ ६ ॥

७ ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते ॥

एकमेकं सुशस्तिभिः ॥ ७ ॥

८ अधारयन्त वन्हयोऽभजन्त सुकृत्यया ।।
भागं देवेषु यज्ञियम् ।। ८ ।।

इति प्रथमं आर्भवं सूक्तं समाप्तम् ।।

(२) अथ द्वितीयं आर्भवं सूक्तम् ।।

"ततं नवार्भवं तु० स॰सू॰ (नवर्चं) सूक्तद्वयम्
स्॰ कुत्सः आङ्गिरसः ऋषिः। ऋभवो देवता पञ्चमीनवम्यौ
(२) त्रिष्टुभौ शिष्टाः सप्त जगत्यः ।। (छन्दः)

१
ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ।। ।। १ ।।

१०
आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम केचिदापयः ।।
सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ।।

११ ।। २ ।।
तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।।
त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ।।
।। ३ ।।

१२
विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ॥
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः
२ ॥४॥

१३
क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् ॥
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥५॥
२

१४
आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ॥
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन् दिवो रजः
२ ॥६॥

१५
ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ॥
युष्माकं देवा अवसाऽहनि प्रियेऽ३भि तिष्ठेम पृत्सुतीरसुन्वताम् ॥
२ ॥७॥

१६
निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ॥
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥
२ ॥८॥

१७
वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः ॥
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥
२
॥इति द्वितीयम् आर्भवं सूक्तम् ॥९॥

॥ समाप्तम् ॥
२

अथ तृतीयं आर्भवं सूक्तम्। ऋ. १।१११।१-५)

कुत्सस्यार्षम्। पञ्चर्चम्।

स:
(३) "तक्षन् पञ्चोना त्रिष्टुप् (५-) (चतस्रो जगत्यः
कुत्सः ऋषिः। ऋभवो देवता। अन्त्या त्रिष्टुप्। शिक्षाः

१८
तक्षन् रथं सुवृतं विद्मनापस स्तक्षन् हरी इन्द्र वाहा वृषण्वसू ॥
तक्षन् पितृभ्यां मृभवो युवद्वय स्तक्षन् वत्साय मातरं सचाभुवम् ॥
॥१॥

१९
आ नो यज्ञाय तक्षत ऋभुमद्वयः क्रत्वे दक्षाय सुप्रजावतीमिषम् ॥
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम्
॥२॥

२०
आ तक्षत सातिमस्मभ्यं मृभवः सातिं रथाय सातिमर्वते नरः ॥
सातिं नो जैत्रीं सम्महेत विश्वाहा जामिमजामिं पृतनासु सक्षणिम्
॥३॥

२१
ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून् वाजान् मरुतः सोमपीतये ॥
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये
जिषे ॥४॥

२२
ऋभुर्भराय संशिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ॥
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

॥ इति तृतीयमार्भवं सूक्तम् ॥५॥

॥ समाप्तम् ॥

॥ अथ चतुर्थमार्भवं सूक्तम् ॥

"दैर्घतमस मार्भवम् ॥ (ऋक्.सं.मं.१।१६१।१-१४)

दीर्घतमाः ऋषिः ऋभवो देवताः। जगती छन्दः। अन्त्या त्रिष्टुप्"

"किमु श्रेष्ठः पञ्चना आर्भवम् त्रिष्टुबन्तम्।

सू. (४)

२३- "किमु श्रेष्ठः किं यविष्ठो न आजगन्
किमीयते दूत्यं१ कद्यदूचिम ॥
न निन्दिम चमसं यो महाकुलो-
ऽग्ने भ्रातर्द्रुण इद् भूतिमूदिम ॥१॥

२४ "एकं चमसं चतुरः कृणोतन
तद् वो देवा अब्रुवन् तद् व आगमम् ॥
सौधन्वना यद्येवा करिष्यथ
साकं देवैर्यज्ञियासो भविष्यथ ॥२॥

२५ "अग्निं दूतं प्रति यदब्रवीतना-
श्वः कर्त्वो रथ उतेह कर्त्वः ॥
धेनुः कर्त्वा युवशा कर्त्वा द्वा
तानि भ्रातरनु वः कृत्व्येमसि ॥३॥

२६ "चकृवाँसं ऋभवस्तदपृच्छत
क्वेदभूद्यःस्य दूतो न आजगन् ॥
यदावाख्यच्चमसाञ्चतुरः कृताना-
दित् त्वष्टा ग्नास्वन्तर्न्यानजे ॥ ४ ॥

२७ हनामैनाँ इति त्वष्टा यदब्रवी-
च्चमसं ये देवपानमनिन्दिषुः ॥
अन्या नामानि कृण्वते सुते सचाँ
अन्यैरेनान् कन्या३ नामभिः स्परत ॥ ५ ॥

२८ इन्द्रो हरी युयुजे अश्विना रथं
बृहस्पतिर्विश्वरूपामुपाजत ॥
ऋभुर्विभ्वा वाजो देवाँ अगच्छत
स्वपसो यज्ञियं भागमैतन ॥ ६ ॥

२९ निश्चर्मणो गामरिणीत धीतिभि-
र्या जरन्ता युवशा ता कृणोतन ॥
सौधन्वना अश्वादश्वमतक्षत
युक्त्वा रथमुप देवाँ अयातन ॥ ७ ॥

३० इदमुदकं पिबते त्यब्रवीतने-
दं वा घा पिबता मुञ्जनेजनम् ॥
सौधन्वना यदि तन्नेव हर्यथ
तृतीये घा सवने मादयाध्वै ॥८॥

३१ आपो भूयिष्ठा इत्येको अब्रवीद्-
अग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ॥
वधर्यन्तीं बहुभ्यः प्रैको अब्रवीद्-
ऋता वदन्तश्चमसाँ अपिंशत ॥९॥

३२ श्रोणामेक उदकं गामवाजति
मांसमेकः पिंशति सूनयाभृतम् ॥
आ निम्रुचः शकृदेको अपाभरत
किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥१०॥

३३ उद्वत्स्वस्मा अकृणोतना तृणं
निवत्स्वपः स्वपस्यया नरः ॥
अगोह्यस्य यदसस्तना गृहे
तदद्येदमृभवो नानु गच्छथ ॥११॥

३४ सम्मील्य यद् भुवना पर्यसर्पत
क्वस्वित् तात्या पितरा व आसतुः ।
अशपत यः करस्नं व आददे
यः प्राब्रवीत् प्रो तस्मा अब्रवीतन ॥ १२ ॥

३५ सुषुप्वांस ऋभवः तदपृच्छता-
गोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्
संवत्सर इदमद्या व्यख्यत ॥ १३ ॥

३६ दिवा यान्ति मरुतो भूम्याग्नि-
रयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रै-
र्युष्मां इच्छन्तः शवसो नपातः ॥ १४ ॥

॥ इति चतुर्थं आर्भवं सूक्तम् ॥
समाप्तम्

॥ अथ षष्ठमं आर्भवं सूक्तम्

॥ विश्वामित्रस्यार्षम् ॥ ऋक्सं० ३।६० ॥

॥ इहेह वः सप्तार्भवम् तृचोऽन्त्यः ऐन्द्रश्च ॥ सू॰

विश्वामित्रः गाथिनः ऋषिः । ऋभवो देवताः ।

सू (५) अन्त्यस्य तृचस्य इन्द्रश्च देवताः । जगती छन्दः ।

२७ ॥ इहेह वो मनसा बन्धुता नर

उशिजो जग्मुरभि तानि वेदसा ॥

याभिर्मायाभिः प्रतिजूतिवर्पसः

सौधन्वना यज्ञियं भागमानश ॥ १ ॥

२८ इन्द्रस्य सख्यमृभवः समानशु

र्मनोर्नपातो अपसो दधन्विरे ॥

सौधन्वनासो अमृतत्वमेरिरे

विष्ट्वी शमीभिः सुकृतः सुकृत्यया ॥ २ ॥

२९ याभिः शचीभिश्चमसाँ अपिंशत

यया धिया गामरिणीत चर्मणः ॥

येन हरी मनसा निरतक्षत

तेन देवत्वमृभवः समानश ॥ ३ ॥

४० इन्द्रेण याथ सरथं सुते सचाँ
अथो वशानां भवथा सह श्रिया ॥
नवः प्रतिमै सुकृतानि वाघतः
सौधन्वना ऋभवो वीर्याणि च ॥ ४ ॥

॥ इन्द्रः २ ऋभवश्च देवताः ५-७ ॥

४१ इन्द्र ऋभुभि र्वाजवद्भिः समुक्षितं
सुतं सोम मावृषस्वा गभस्त्योः ॥
धियेषितो मघवन् दाशुषो गृहे
सौधन्वनेभिः सह मत्स्वा नृभिः ॥ ५ ॥

२

४२ इन्द्र ऋभुमान् वाजवान् मत्स्वेह नो -
ऽस्मिन् त्सवने शच्या पुरुष्टुत ॥
इमानि तुभ्यं स्वसराणि येमिरे
व्रता देवानां मनुषश्च धर्मभिः ॥ ६ ॥

२

४३ इन्द्र ऋभुभि र्वाजिभि र्वाजयन्निह
स्तोमं जरितु रुप याहि यज्ञियम् ॥
शतं केतेभि रिषिरेभि रायवे
सहस्रणीथो अध्वरस्य होमनि ॥ ७ ॥
२ इति पंचमं आर्भवं सूक्तं समाप्तम् ॥

॥ अथ षष्ठं आर्भवं सूक्तम् ॥
(ऋक्: ४।३३।१-११)

॥ वामदेवस्यार्षम् एकादशर्चम् ॥

"प्र ऋभुभ्य एकादशार्भवं तु" त्रैष्टुभम्"

॥ वामदेव ऋषिः। ऋभवो देवताः। त्रिष्टुप् छन्दः ॥

ज (धे)

४४ "प्र ऋभुभ्यो दूतमिव वाचमिष्य
उपस्तिरे श्वैतरीं धेनुमीळे ॥
ये वातजूतास्तरणिभिरेवैः
परि द्यां सद्यो अपसो बभूवुः ॥ १ ॥

४५ यदाऽरमक्रन्नृभवः पितृभ्यां
परिविष्टी वेषणा दंसनाभिः ॥
आदिद्देवानामुप सख्यमायन्
धीरासः पुष्टिमवहन्मनायै ॥ २ ॥

४६ पुनर्ये चक्रुः पितरा युवाना
सना यूपेव जरणा शयाना ॥
ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो
मधुप्सरसो नोऽवन्तु यज्ञम् ॥ ३ ॥

४७ यत् सं वत्स मृभवो गामरक्षन्
यत् सं वत्स मृभवो मा अपिंशन् ॥
यत् सं वत्समभरन् भासो अस्या-
स्ताभिः शचीभिरमृतत्वमाशुः ॥ ४ ॥

४८ ज्येष्ठ आह चमसा द्वा करोमि
कनीयान् त्रीन् कृणवामेत्याह ॥
कनिष्ठ आह चतुरस्करेति
त्वष्ट ऋभवस्तत् पनयद् वचो वः ॥ ५ ॥

४९ सत्यमूचुर्नर एवा हि चक्रु-
रनु स्वधा मृभवो जग्मुरेताम् ॥
विभ्राजमानाँश्चमसाँ अहेवा-
वेनत् त्वष्टा चतुरो ददृश्वान् ॥ ६ ॥

५० द्वादश द्यून् यदगोह्यस्या-
तिथ्ये रणन् ऋभवः ससन्तः ॥
सुक्षेत्राकृण्वन्ननयन्त सिन्धून्
धन्वातिष्ठन्नोषधीर्निम्नमापः ॥ ७ ॥

५१ रथं ये चक्रुः सुवृतं नरेष्ठां
ये धेनुं विश्वपुषं विश्वरूपाम् ॥
त आ तक्षन्त्वृभवो रयिं नः
स्ववसः स्वपसः सुहस्ताः ॥ ८ ॥

५२ अपो ह्येषा मजुषन्त देवा -
अभि क्रत्वा मनसा दीध्यानाः ॥
वाजो देवाना मभवत् सुकर्मे
न्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥ ९ ॥

५३ ये हरी मेधयोक्था मदन्त
इन्द्राय चक्रुः सुयुजा ये अश्वा ॥
ते रायस्पोषं द्रविणान्यस्मे
धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥ १० ॥

५४ इदाह्नः पीतिमुत वो मदं धु -
र्न ऋते श्रान्तस्य सख्याय देवाः ॥
ते नूनमस्मे ऋभवो वसूनि (इति षष्ठं आमवि
तृतीये अस्मिन् त्सवने दधात ॥ ११ ॥ सूक्तं ॥

॥ अथ सप्तमं आर्भवं सूक्तम् ॥

(सू.७) ॥ वामदेवार्षम् एकादशर्चं त्रैष्टुभम् ॥

(ऋ.सं.मं.४।३४।१-११)

७

५५ ऋभुर्विभ्वा वाज इन्द्रो नो अच्छे-
मं यज्ञं रत्नधेयोप यात ॥
इदा हि वो धिषणा देव्यह्ना-
मधात् पीतिं सं मदो अग्मता वः॥१॥

५६ विदानासो जन्मनो वाजरत्ना
उत ऋभुभिर्ऋभवो मादयध्वम् ॥
सं वो मदा अग्मत सं पुरन्धिः
सुवीरामस्मे रयिमेरयध्वम् ॥ २॥

५७ अयं वो यज्ञ ऋभवो अकारि
यमा मनुष्वत् प्रदिवो दधिध्वे ॥
प्र वोऽच्छा जुजुषाणासो अस्थु-
रभूत विश्वे अग्रियोत वाजाः॥३॥

५८ अभूदु वो विधतो रत्नधेय -
मिदा नरो दाशुषे मर्त्याय ॥
पिबत वाजा अभृतो ददे वो
महि तृतीयं सवनं मदाय ॥४॥

२

५९ आ वाजा यातोप न ऋभुक्षा
महो नरो द्रविणसो गृणानाः ॥
आ वः पीतयोऽभि पित्वे अन्हा -
मिमा अस्तं नव स्व इव ग्मन् ॥५॥

२

६० आ नपातः शवसो यातनोपे -
मं यज्ञं नमसा हूयमानाः ॥
सजोषसः सूरयो यस्य च स्थ
मध्वः पात रत्नधा इन्द्रवन्तः ॥६॥

२

६१ सजोषा इन्द्र वरुणेन सोमं
सजोषाः पाहि गिर्वणो मरुद्भिः ॥
अग्ने पाभि ऋतुपाभिः सजोषा
ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥७॥

६२ सजोषस आदित्यैर्मादयध्वं
सजोषस ऋभवः पर्वतेभिः ॥
सजोषसो दैव्येना सवित्रा
सजोषसः सिन्धुभी रत्नधेभिः ॥ ८ ॥

२

६३ ये अश्विना ये पितरा य ऊती
धेनुं ततक्षु ऋभवो ये अश्वा ॥
ये अंसत्रा य ऋधग् रोदसी ये
विभ्वो नरः स्वपत्यानि चक्रुः ॥ ९ ॥

२

६४ ये गोमन्तं वाजवन्तं सुवीरं
रयिं धत्त वसुमन्तं पुरुक्षुम् ॥
ते अग्रेपा ऋभवो मन्दसाना
अस्मे धत्त ये च रातिं गृणन्ति ॥ १० ॥

२

६५ नापाभूत न वोतीतृषामा -
निः शस्ता ऋभवो यज्ञे अस्मिन् ॥
समिन्द्रेण मदथ सं मरुद्भिः (इति सप्तमं आर्भवं
सं राजभी रत्नधेयाय देवाः ॥ ११ ॥ सूक्तं
॥ ७ ॥ २ समाप्तम्)

"अथ अष्टमं आर्भवं सूक्तम्"
(तृतीयं)

८
(८) वामदेवस्यार्षम्, नवर्चम् त्रैष्टुभम् " (ऋ. ४।३५।१-९)

६६ इहोप यात शवसो नपातः
सौधन्वना ऋभवो मा प भूत ॥
अस्मिन् हि वः सवने रत्नधेयं
गमन्त्विन्द्र मनु वो मदासः ॥ १॥

६७ आगन् ऋभूणामिह रत्नधेय-
मभूत् सोमस्य सुषुतस्य पीतिः ॥
सुकृत्यया यत् स्वपस्यया चँ
एकं विचक्र चमसं चतुर्धा ॥२॥

६८ व्यकृणोत चमसं चतुर्धा
सखे वि शिक्षेत्यब्रवीत ॥
अथैत वाजा अमृतस्य पन्थां
गणं देवानामृभवः सुहस्ताः ॥३॥

६९ किम्मयः स्विच्चमस एष आस
यं काव्येन चतुरो विचक्र ॥
अथा सुनुध्वं सवनं मदाय
पात ऋभवो मधुनः सोम्यस्य ॥४॥

७० शच्यो ऽकर्त पितरा युवाना
शच्यो ऽकर्त चमसं देवपानम् ॥
शच्या हरी धनुतरावतष्टे –
न्द्रवाहावृभवो वाजरत्नाः ॥ ५ ॥

७१ यो वः सुनोत्यभिपित्वे अह्नां
तीव्रं वाजासः सवनं मदाय ॥
तस्मै रयिमृभवः सर्ववीर –
मातक्षत वृषणो मन्दसानाः ॥ ६ ॥

७२ प्रातः सुतमपिबो हर्यश्व
माध्यन्दिने सवनं केवलं ते ॥
समृभुभिः पिबस्व रत्नधेभिः
सखीँर्याँ इन्द्र चकृषे सुकृत्या ॥ ७ ॥

७३ ये देवासो अभवता सुकृत्या
श्येना इवेदधि दिवि निषेद ॥
ते रत्नं धात शवसो नपातः
सौधन्वना अभवतामृतासः ॥ ८ ॥

७४ यत् तृतीयं सवनं रत्नधेय-
मकृणुध्वं स्वपस्या सुहस्ताः ।
तदृभवः परिषिक्तं व एतत्
सं मदेभिरिन्द्रियेभिः पिबध्वम् ॥९॥

इति अष्टमम् आर्भवं सूक्तं समाप्तम् ॥

॥ अथ नवमं आर्भवं सूक्तम् ॥
चतुर्थम्

ऋ. (९) वामदेवस्यार्षम्। नवर्चम्। जागतम्। अन्त्या त्रिष्टुप्।

अ. - "अनश्वो, न्त्या त्रिष्टुप्। (ऋ. सं.) ४।३६।१)

७५ अनश्वो जातो अनभीशुरुक्थ्यो३
रथस्त्रिचक्रः परि वर्तते रजः ।
महत् तद् वो देव्यस्य प्रवाचनं
द्यामृभवः पृथिवीं यच्च पुष्यथ ॥१॥

७६ रथं ये चक्रुः सुवृतं सुचेतसो-
ऽविह्वरन्तं मनसस्परि ध्यया ।
ताँ ऊन्व१स्य सवनस्य पीतय
आ वो वाजा ऋभवो वेदयामसि ॥२॥

७७ तद् वो वाजा ऋभवः सुप्रवाचनं
देवेषु विभ्वो अभवन् महित्वनम् ॥
जिव्री यत् सन्ता पितरा सनाजुरा
पुनर्युवाना चरथाय तक्षथ ॥३॥

२

७८ एकं विचक्र चमसं चतुर्वयं
निश्चर्मणो गामरिणीत धीतिभिः ।
अथा देवेष्वमृतत्वमानश
श्रुष्टी वाजा ऋभवस्तद् व उक्थ्यम् ॥४॥

२

७९- ऋभुतो रयिः प्रथमश्रवस्तमो
वाजश्रुतासो यमजीजनन्नरः ।
विभ्वतष्टो विदथेषु प्रवाच्यो
यं देवासोऽवथा स विचर्षणिः ॥५॥

२

८० स वाज्यर्वा स ऋषिर्वचस्यया
स शूरो अस्ता पृतनासु दुष्टरः ।
स रायस्पोषं स सुवीर्यं दधे
यं वाजो विभ्वाँ ऋभवो यमाविषुः ॥६॥

२१

८१ श्रेष्ठं वः पेशो अधि धायि दर्शतं
स्तोमो वाजा ऋभव स्तं जुजुष्टन ।
धीरासो हि ष्ठा कवयो विपश्चित -
स्तान् वं एना ब्रह्मणा वेदयामसि ॥ ७ ॥

८२ यूय मस्मभ्यं धिषणाभ्य स्परि
विद्वांसो विश्वा नर्याणि भोजना ।
द्युमन्तं वाजं वृषशुष्म मुत्तम -
मा नो रयि मृभव स्तक्षता वयः ॥ ८ ॥

८३ इह प्रजा मिह रयिं रराणा
इह श्रवो वीरवत् तक्षता नः ।
येन वयं चितये मा त्यन्यान्
तं वाजं चित्र मृभवो ददा नः ॥ ९ ॥

॥ इति वामदेवार्षं चतुर्थ मार्षं सूक्तम् ॥

आदितः नवमं आर्षं सूक्तं समाप्तम् ॥

॥अथ दशमम् आर्भवं सूक्तम्

वामदेवऋषिः पञ्चाशत् अष्टर्चं सूक्तम्

सं.१०| "उप नोऽष्टौ चतुरनुष्टुबन्तम्" ४।३७।८)

वा(५)

८४ उप नो वाजा अध्वरमृभुक्षा
देवा यात पथिभिर्देवयानैः।
यथा यज्ञं मनुषो विक्ष्वाऽसु
दधिध्वे रण्वाः सुदिनेष्वह्नाम् ॥१॥

८५ ते वो हृदे मनसे सन्तु यज्ञा
जुष्टासो अद्य घृतनिर्णिजो गुः।
प्र वः सुतासो हरयन्त पूर्णाः
क्रत्वे दक्षाय हर्षयन्त पीताः ॥२॥

८६ त्र्युदायं देवहितं यथा वः
स्तोमो वाजा ऋभुक्षणो ददे वः।
जुह्वे मनुष्वदुपरासु विक्षु
युष्मे सचा बृहद्दिवेषु सोमम् ॥३॥

८७ पीवो अश्वाः शुचद्रथा हि भूता -
यःशिप्रा वाजिनः सुनिष्काः ॥
इन्द्रस्य सूनो शवसो नपातोऽ-
नुवश्चेत्यग्रियं मदाय ॥ ४ ॥

८८ ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम् ॥
इन्द्रस्वन्तं हवामहे सदासातम मश्विनम् ॥५॥

८९ सेदृभवो यमवथ यूयं वयं च सूरयः ॥ ॥
स धीभिरस्तु सनिता मेधसाता सो अर्वता ॥६॥

९० विनो वाजा ऋभुक्षणः पथश्चितन यष्टवे ॥
अस्मभ्यं सूरयः स्तुता विश्वा आशास्तरीषणि ॥७॥

९१ तन्नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम् ॥
अस्मभ्यं चर्षणिभ्य आ पुरुशस्त मघत्तये ॥ ८ ॥

इति वामदेवार्षिकं पञ्चमं सूक्तम् ५ (४८ ऋडिता)
नि

॥ आदितः दशमं आर्भवं सूक्तं समाप्तम् ॥

अथ एकादशं आर्भवं सूक्तम् ।

(११) "ऋभुक्षण आर्भवम् अन्त्या वैश्वदेवी वा ।
ऋभुक्षण इति चतुर्ऋचं वासिष्ठस्यार्षं मार्भवम्
अन्त्या वैश्वदेवी वा त्रैष्टुभम् ।

१२ ऋभुक्षणो वाजा मादयध्व-
मस्मे नरो मघवानः सुतस्य ॥
आ वोऽर्वाचः क्रतवो न यातां
विभ्वो रथं नर्यं वर्तयन्तु ॥१॥

१३ ऋभुर्ऋभुभिरभि वः स्याम
विभ्वो विभुभिः शवसा शवांसि ॥
वाजो अस्माँ अवतु वाजसाता-
विन्द्रेण युजा तरुषेम वृत्रम् ॥२॥

१४ ते चिद्धि पूर्वीरभि सन्ति शासा
विश्वाँ अर्य उपरताति वन्वन् ॥
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः
शत्रोर्मिथत्या कृणवन् वि नृम्णम् ॥३॥

॥ ऋभुदेवतासूक्तानि ॥

॥ प्रथमं आर्भवं सूक्तं मेधातिथेरार्षम् ॥

॥ ऋक्संहितायां प्रथमे मण्डले द्वादशतमे सूक्ते निर्दिष्टः ऋषिः मेधातिथिः "अग्निं द्वादशमेधातिथिः" इति। सोऽयमेव अत्र अनुवर्तते "अयम् ह्वावार्भवम्" इति अस्मिन् विंशति-तमे आर्भव सूक्ते ॥

॥ स्वाध्यायनमध्यम् ॥

॥ यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥

अथ प्रथमाष्टके द्वितीयोऽध्यायः आरभ्यते। तत्र "अयं देवाय" इति एकविंशं (तृतीयं) सूक्तम्। तस्य ऋषिः छन्दसी पूर्ववत्। ऋभुदेवताकत्वमनुक्रम्यते। "अयमवार्भवम्" इति। विनियोगस्तु सूक्तस्य लैङ्गिकः स्मार्तो वा द्रष्टव्यः। अष्टरस्य प्रथमे छन्दोमे वैश्वदेवशस्त्रे "अयं देवाय जन्मने" इति आर्भवस्तृचः। अथ छन्दोमाः इति खण्डे सूत्रितम् - "आभिर्ला देव सवितः प्रेतां यज्ञस्य शम्भुवा अयं देवाय जन्मने इति तृचाः। (आश्व. श्रौ. ८.६) इति।

प्रथमा ऋक् (ऋक् सं. मं. १।२०।१-८)

"अयं देवाय जन्मने स्तोमो विप्रेभिरासया।
अकारि रत्नधातमः॥ १५

पदपाठः

अयम्। देवाय। जन्मने। स्तोमः। विप्रेभिः। आसया।
अकारि। रत्नऽधातमः॥ १५

(मेधातिथिः ऋषिः। ऋभवो देवता। गायत्री छन्दः। २५

ऋभवो हि मनुष्याः सन्तः तपसा देवत्वं प्राप्ताः। तेऽत्र सूक्ते देवताः। तत्संघोजन्यस्थान वाचिना जन्मशब्देन (पूर्व व्याख्यातेन अत्र) निर्दिश्यते।
"जन्मने" जायमानाय ऋभुसंघस्वरूपाय" देवाय तत्प्रीत्यर्थम्।
अयं स्तोमः स्तोत्रविशेषः विप्रेभिः मेधाविभिः ऋत्विग्भिः आसया स्वकीयास्येन अकारि निष्पादितः। कीदृशः स्तोमः। रत्नधातमः अतिशयेन रमणीय मणिमुक्तादि धनप्रदः। स्तोत्रेण तुष्टाः ऋभवो धनं प्रयच्छन्तीत्यर्थः।
आसया त आस्य शब्दात् तृतीयैकवचनस्य "सुपां सुलुक्" इत्यादिना याजादेशः। व्यत्ययेन प्रकृतियकारस्य लोपः। "चितः" इत्यन्तोदात्तः। धातमः रत्नानि दधातीति रत्नधाः। कृदुत्तरपद प्रकृतिस्वरत्वम्। १५

"द्वितीया ऋक्"

"य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी ।
शमीभिर्यज्ञमाशत ॥२॥

ये । इन्द्राय । वचःऽयुजा । ततक्षुः । मनसा । हरी ॥
शमीभिः । यज्ञम् । आशत ॥

ये ऋभवः इन्द्राय इन्द्रार्थं वचोयुजा ताडनादिकं विना वाङ्मात्रेण रथे युज्यमानौ सुशिक्षितौ हरी एतन्नामकावश्वौ मनसा ततक्षुः सम्पादितवन्तः । ऋभूणां सत्यसङ्कल्पत्वात् तत्सङ्कल्पमात्रेण इन्द्रस्य अश्वौ सम्पन्नावित्यर्थः ॥ ते ऋभवः शमीभिः चमसादिनिष्पादनरूपैः कर्मभिः यज्ञं अस्मदीयं आशत व्याप्तवन्तः । "अपः अप्नः" इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु "शमी शिमी" (नि. २.१.२२) इति पठितत्वात् । वचोयुजा । वचसा युज्यमानौ । "सत्सूद्विष" इत्यादिना क्विप् । "सुपां सुलुक्" इत्यादिना विभक्तेराकारः । कृदुत्तरपदप्रकृतिस्वरः । ततक्षुः । "तक्षू तनूकरणे" । लिटि झेः उसादेशः । पादादित्वात् निघाताभावः । शमीभिः । शाम्यन्ति पापानि इति शम्यः कर्माणि । औणादिक इन् । "कृदिकारादक्तिनः" (पा. ग. ४.१.४५) इति ङीष् । वृषादित्वादाद्युदात्तः । आशत । "अशू व्याप्तौ" । लङि झस्य अदादेशः । "स्वादिभ्यः श्नुः" । तस्य "बहुलं छन्दसि" इति लुक् । अडागमः । "तिङ्ङतिङः" इति निघातः ॥२॥

॥ તૃતીયા ઋક્ ॥

તક્ષન્નાસત્યાભ્યાં પરિજ્માનં સુખં રથમ્ ।
તક્ષન્ ધેનું સબર્દુઘામ્ ॥ ૩ ॥

પદપાઠઃ — તક્ષન્ । નાસત્યાભ્યામ્ । પરિઽજ્માનમ્ । સુઽખમ્ । રથમ્ ।
તક્ષન્ । ધેનુમ્ । સબઃઽદુઘામ્ ॥ ૩ ॥

૨

નાસત્યાભ્યામ્ અશ્વિદેવપ્રીત્યર્થમ્ રથં તક્ષન્ ઋભવો દેવાઃ કિંચિદ્ રથં તક્ષન્ તક્ષણેન સમ્પાદિતવન્તઃ । કીદૃશમ્ પરિજ્માનમ્ પરિતો ગન્તારમ્ । સુખં ઉપવિશ્ય ઉપવેશને સુખકરમ્ । કિંચ ધેનું કાંચિદ્ ગાં તક્ષન્ । ધાતૂનામ્ અનેકાર્થત્વાત્ તક્ષતિરત્ર સમ્પાદનવાચી । કીદૃશીં ધેનુમ્ । સબર્દુઘામ્ સબરઃ ક્ષીરસ્ય દોગ્ધ્રીમ્ । તક્ષન્ । "બહુલં છન્દસિ" (પા.સૂ. ૬.૪.૭૫) ઇતિ અડભાવઃ । નાસત્યાભ્યામ્ ઇતિ સત્સુ સાધૂ સત્યૌ અસત્યૌ । ન અસત્યૌ નાસત્યૌ । "નભ્રાણ્નપાત્" (પા.સૂ. ૬.૩.૭૫) ઇત્યાદિના નલોપાભાવઃ । પરિજ્માનમ્ અજેઃ પરિપૂર્વસ્ય "શ્વન્નુક્ષન્" (ઉણા. સૂ. ૧.૧૫૯) ઇત્યાદિના મનિન્પ્રત્યયે અકારલોપઃ । આદ્યુદાત્તત્વં ચ નિપાતનાત્ । સબર્દુઘામ્ સબરઃ પયઃ દોગ્ધીતિ સબર્દુઘા । "દુહઃ કબ્ઘશ્ચ" (પા.સૂ. ૩.૨.૭૦) ઇતિ કપ્ । સબર ઇતિ ક્ષીરનામ પ્રાતિપદિકં ક્ષીરવાચી । ઇતિ સમ્પ્રદાયવિદઃ । કપઃ પિત્ત્વાત્ અનુદાત્તત્વે ધાતુસ્વરઃ । પ્રાતિપદિકસ્વરઃ ઇતિ સમાસે કૃદુત્તરપદપ્રકૃતિસ્વરત્વમ્

द्वितीये छन्दोमे वैश्वदेवशस्त्रे "युवाना पितरा पुनः"
इति आग्निमारुत्यः। द्वितीयस्यां "अग्निं वो देवम्" इति खण्डे सूत्रितम्।
"मही द्यौः पृथिवी चनः युवाना पितरा पुनः" इति तृचौ। (आश्व.श्रौ.
सूत्रम् ८।१०) इति ।

॥ अथ चतुर्थी ऋक् ॥

युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः ।
ऋभवो विष्ट्यक्रत ॥४॥

पदपाठः — युवाना । पितरा । पुनरिति । सत्यऽमन्त्राः । ऋजुऽयवः ।
ऋभवः । विष्टी । अक्रत ॥४॥

(भाष्यम्) ऋभवः एतन्नामकाः देवाः पितरौ स्वकीयौ मातापितरौ पूर्णं वृद्धावपि पुनः युवाना तरुणौ अक्रत कृतवन्तः। कीदृशाः। सत्यमन्त्राः अवितथमन्त्रसामर्थ्योपेताः। पुरश्चरणानुष्ठानेन सिद्धमन्त्रत्वात्, यद्यत् फलमुद्दिश्य मन्त्राः प्रयुज्यन्ते तत्तत्फलं तथैव सम्पादयन्ति। तस्मात् जीर्णयोः पित्रोः युवत्वं सम्पादयितुं समर्था इत्यर्थः। ऋजूयवः ऋजुना मार्गेण इच्छन्तः फलसहिता इत्यर्थः। अत एव एतेषामनुष्ठिता मन्त्राः सिध्यन्ति। विष्टी व्याप्त्या आप्रियुक्ताः, सर्वेषु कार्येषु कदापि मन्त्रसामर्थ्यस्य अप्रतिघातत्वेन व्याप्तिरुच्यते

ऋभुशब्दं यास्कः विनिर्वक्ति - "ऋभव उरु भान्तीति वा
ऋतेन भान्तीति वा ऋतेन भवन्तीति वा (नि. ११.१५) इति।
पुंवाच्य - ऋभुशब्दो यौगिकः [illegible] निपात्यते।
"सुपां सुलुक्" इत्यादिना। विभक्तेः आकारः, [illegible]
पूर्ववदाकारः। तस्य मन्त्राः बहुव्रीहौ पूर्वपद प्रकृतिस्वरः॥
ऋभुशब्दो भावप्रधानः ऋभुत्वम् [illegible] इत्यर्थः।
"अकृत्सार्वधातुकयोर्दीर्घः" (पा.सू. ७.४.२५) इति दीर्घः।
"क्याच्छन्दसि" (पा.सू. ३.२.१७०) इति उ प्रत्ययः।
प्रत्ययस्वरः। क्तिचौ "[illegible]" "क्तिच्क्तौ च संज्ञायाम्"
(पा.सू. ३.३.१७४) इति क्तिच्। तितुत्र इत्यादिना
इट्प्रतिषेधः [illegible]" इयाड् इयाज् ईकाराणाम्
उपसंख्यानम्" (पा.सू. ७.१.३९) इति तस्य ईकारादेशः
तत्र "अलोऽन्त्यस्य" (पा.सू. १.१.५२) इति अकारस्य
भवति। ततः "आद्गुणः" इति गुणे कृते "प्रथमयोः पूर्व-
सवर्णः" (पा.सू. ६.१.१०२) इति पूर्वसवर्णदीर्घः।
तं बाधित्वा परत्वात् "नादिचि" (पा.सू. ६.१.१०४) इति
ह्रस्वस्य गुणेन [illegible] सम्प्रसारणपूर्वकस्य विधेः
अनित्यत्वात् [illegible] कृत्वा [illegible] आत्मनेपद [illegible]
आदादेशः "सुपां सुलुक्" (पा.सू. ७.१.३९) इत्यादिना [illegible]
आद्युदात्तः निपातः॥

॥ अथ पञ्चमी ऋक् ॥

सं वो मदासो अग्मतेन्द्रेण च मरुत्वता ।
आदित्येभिश्च राजभिः ॥ ५ ॥

पदपाठः- सम् । वः । मदासः । अग्मत । इन्द्रेण । च । मरुत्वता ।
आदित्येभिः । च । राजऽभिः ॥ ५ ॥

भाष्यम्- हे ऋभवः वः युष्माकं सम्बन्धिनः मदासः मदहेतवः सोमाः इन्द्रेण च आदित्येभिः आदित्यैश्च सम् अगमत सङ्गताः। ऋभूणां इन्द्रादिभिः सह सोमपानं तृतीयसवनेऽस्ति। अत एव आवाहननिगदः आश्वलायनेन एवं पठितः "इन्द्रमादित्यवन्त-मृभुमन्तं विभुमन्तं वाजवन्तं बृहस्पतिवन्तं विश्वदेव्यावन्त-मावह" (आश्व.श्रौ. ५।३) इति। कीदृशेनेन्द्रेण मरुत्वता मरुद्भिर्युक्तेन। अत एव मन्त्रान्तरमेवमाम्नायते "मरुत्वाँ इन्द्र सख्ये ते अस्तु" (ऋ.सं. ८।६६।७) इति। कीदृशैरादित्येभिः राजभिः दीप्यमानैः॥ मदासः - माद्यन्ति एभिरिति मदाः सोमाः "मदोऽनुपसर्गे" (पा.सू. ३।३।६७) इत्यप्। तस्य जसि "आज्जसेरसुक्" इति जसः असुगागमः। अग्मत गमेः संपूर्वात् लुङि "समो गम्यृच्छिभ्याम्" (पा.सू. १।३।२९) इत्यादिना आत्मनेपदम्। च्लेः आदेशः। "मन्त्रे घस" इत्यादिना च्लेर्लुक्।

"गामृत" (पा.सू. ६।४।१६) इत्युपधाया दीर्घः।
"अनदिवात्र" इति सूत्रो भवति प्रयोगः। निघातः॥
[illegible] कृता। भवतः अस्य सर्वोऽपि [illegible] (पा.सू. ८.४.२९) इति [illegible] संज्ञायाम् [illegible]
[illegible]। "ह्रस्वः" (पा.सू. ८, २, १०) इति [illegible]
आर्धधातुकत्वम्। "बहुलं छन्दसि" (पा.सू. ७.१.१०) इति।
[illegible] "बहुवचने" [illegible]
[illegible] [illegible]
[illegible]

संहितापाठः

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम्।
अकर्त चतुरः पुनः ॥६॥

पदपाठः

उत। त्यम्। चमसम्। नवम्। त्वष्टुः। देवस्य। निःऽकृतम्।
अकर्त। चतुरः। पुनरिति ॥६॥

भाष्यम् — उत अपि च त्वष्टुः [illegible] नामकस्य देवस्य सम्बन्धि [illegible]
तद्व्यापारं नवं नूतनं चमसं सोमधारणक्षमं
काष्ठपात्रविशेषं निष्कृतं [illegible]
शे. प. ७

तक्षणमपि रकुशलस्य तक्षुः शिल्पाः क्रमेवः तेन निर्मितं तमेकं
चमसं पुनरपि चतुरः अकर्म ऋभुभिर्विभक्तानुचमसान् कृतवन्तः।
एकस्य चतुर्विधकरणात् [illegible] [illegible] विस्मयः॥
"पुनं चमसं चतुरः कृणोतन" (ऋ. सं. १।१६१।२) इति॥
अथवा "ष्टु स्तुतौ" [illegible] इति [illegible] कर्मणि अप्रत्ययः
[illegible] सर्वत्र भवति। यत्र [illegible] यथा
"अकर्तरि च कारके संज्ञायाम्" (पा. सू. ३।३।१९) इति कर्तृभिन्ने
सर्वत्र कारके भवति। यद्यपि तत्र संज्ञायामित्युक्तं तथापि
[illegible] संज्ञा [illegible] अनित्यत्वात् असंज्ञायामपि भवत्येव।
[illegible] इति [illegible]। कर्मणि यत्र [illegible]
"तक्ष तक्षू तनूकरणे" औणादिक [illegible] पक्षे
इडागमः (पा. सू. ७, २, ४४)। "स्कोः संयोगाद्योरन्ते च"
(पा. सू. ८, २, २९) इति ककारलोपे [illegible] निष्पन्नम्।
निरुपपदात् कर्मणि क्तः। प्रादिसमासे "नित्यं समासेऽनुत्तर-
पदस्थस्य" (पा. सू. ८।३।४५) इति [illegible] अत्र "कर्तृकरणे कृता"
(पा. सू. २।१।३२) इति समासः। यद्यपि "न लोकाव्यय" (पा. सू. २।३।६९) इति
निषिद्धः तथापि कर्तुः शेषत्वेन विवक्षितत्वात् "कर्तृकर्मणोः
कृति" (पा. सू. २, ३, ६५) इति [illegible] शेषे षष्ठी
(पा. सू. २, ३, ५०) यथा कर्मणि शेषत्वेन विवक्षिते [illegible]
इति।

गुणि रनन्तरः इति निसः उदात्तत्वम्। अ कर्तृ = अकृ धातोः

कृ मोन्तुङि इत्यस्य अस्येन देशः "मन्त्रेघस" इत्यादिना

क्लेलुकि "छन्दस्युभयथा" इति लिङः आर्धधातुकत्वात्

ङित्वाभावेन गुणः। चतुरः "चतुरः शसि" (पा. सू. ६।१।१६७)

इति उकारः उदात्तः। पुनः स्वरादिषु अन्युदात्तः पठितः

२

तृतीयेऽध्याये वैश्वदेवशस्त्रे "ते नो रत्नानि धत्तन" इति

अस्यर्चो आगमौ" तृतीयस्थानम् इति एव पदे सूक्तस्य।

"इन्द्र इदेवाहुत स्तोमैः रत्नानि दधातु तनोः सोमस्य"

(आश्व. श्रौ. ५।१७।१) इति॥

॥ स्वरूपम् ऋक् ॥

ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते।

एकमेकं सुशस्तिभिः॥ ७॥

पदपाठः

ते। नः। रत्नानि। धत्तन। त्रिः। आ। साप्तानि। सुन्वते।

एकम्ऽएकम्। सुशस्तिऽभिः॥ ७॥

२

भाष्यम् पूर्वासु ऋक्षु प्रतिपादिताः ऋभवः। ते यूयम्

सुशस्तिभिः शोभनैरस्मदीयशंसनैः मुक्ताः सन्तः -
नः अस्माकं सम्बन्धिने सुन्वते सोमाभिषवं कुर्वते
यजमानाय रत्नानि रमणीयानि सुवर्णमणिमुक्तादीनि
धनानि एकमेकं क्रमेण प्रत्येकं धत्तन प्रयच्छत॥
सुवर्णादीनां मध्ये प्रति द्रव्यं यावदपेक्षितं तावदिति विवक्षया
एकमेकं इत्युक्तम्॥ कीदृशानि रत्नानि त्रिरा त्रिवारम्।
आवृत्तानि। उत्तमानि मध्यमानि अधमानि च इत्येवं रत्नानां
त्रिरावृत्तिः॥ किंच साप्तानि सप्तसंख्यानि धनवर्गरूपाणि
कर्माणि च धत्तन सम्पादयत॥ कीदृशानि साप्तानि त्रिरा
त्रिवारमावृत्तानि। अग्न्याधेय-दर्शपूर्णमासादीनां सप्तानां
हविर्यज्ञानामेको वर्गः। औपासनहोमो वैश्वदेवमित्यादीनां सप्तानां
पाकयज्ञानां वर्गो द्वितीयः। अग्निष्टोमः अत्यग्निष्टोमः
इत्यादीनां सोमसंस्थानां वर्गस्तृतीयः॥ (ऋ. २५४)
रत्नानि। "रमु क्रीडायाम्"। नित् इत्यनुवृत्तौ "रमेस्त च" (उ. सू.)
इति न प्रत्ययः। तत्सन्नियोगेन मकारस्य तकारः। नित्त्वात्
आद्युदात्तः॥ धत्तन - धत्त। तप्तनप्तनथनाश्च इति -
तशब्दस्य तनादेशः॥ साप्तानां वर्गः साप्तम्। "सप्तनोऽञ् छन्दसि"
(पा. सू. ५.१.६१) इति वर्गे अञ् प्रत्ययः। "ञ्नित्यादिर्नित्यम्" (पा. सू.
६.१.१९७) इति ञित्त्वात् आद्युदात्तत्वं।

अत्र वर्णविपर्ययेण [illegible] लक्ष्यन्ते तेन बहुवचनम्।
अन्यथा एकस्यैव वर्णस्य द्विरावृत्तिः इति एकवचनमेव स्यात्।
सुब्वतीम् "शतुरनुमः" इति विभक्तेरुदात्तत्वम्।
इकमेकम् - "नित्यवीप्सयोः" इति वीप्सायां द्विर्भावः।
एकशब्दः इणः कन्प्रत्ययान्तः आद्युदात्तः। द्वितीयस्य एक-
शब्दस्य "तस्य परमाम्रेडितम्" इति आम्रेडितसंज्ञायाम्
"अनुदात्तं च" (पा.सू. ८।१।३) इति अनुदात्तत्वम्।
सुशस्तिभिः। शोभनाः शस्तयो [illegible] शस्तयः।
"शंसु स्तुतौ" [illegible] क्तिन्। [illegible]
[illegible] इति प्रादिसमासे [illegible]
[illegible] अव्ययपूर्वपदप्रकृति-
स्वरत्वेन तदेव प्राप्नोति तु परेण [illegible]
[illegible] (पा.सू. ६।२, १९७) इत्यादिना उत्तरपदा-
न्तोदात्तत्वेन साधयति॥

॥ अष्टमी ऋक् ॥

अधारयन्त वह्नयोऽभजन्त सुकृत्यया।
भागं देवेषु यज्ञियम्॥ ८॥

पदपाठः - अधारयन्त। वह्नयः। अभजन्त। सु ऽ कृत्यया।
भागम्। देवेषु। यज्ञियम्॥ ८॥

भाष्यम्— वह्नयः चमसादिसाधननिष्पादनेन यज्ञस्य वोढारः
ऋभवः अधारयन्त। पूर्वं मनुष्यत्वेन मरणयोग्या अपि-
अमृतत्वलाभेन प्राणान् धारितवन्तः। तथा च मन्त्रान्तरम्-
आम्नायते- "मर्तासः सन्तो अमृतत्वमानशुः" इति॥ (ऋ.सं. १।११०।४)
किंचापि सुकृत्यया यज्ञसाधनद्रव्यसम्पादनरूपेण शोभन-
कर्मणा देवेषु मध्ये स्थिताः यज्ञियं यज्ञार्हं भागं हविर्लक्षणं
आभजन्त सेवितवन्तः। अयमर्थः "सौधन्वना यज्ञियं भागमानश"
(ऋक्.सं. ३।६०।१) इत्यादिमन्त्रान्तरे निरूपितः। ब्राह्मणेऽपि
"ऋभवो वै देवेषु तपसा सोमपीथमभ्यजयन् (ऐ.ब्रा. ३।३०)
इत्याद्युपाख्यानं निरूपितम्। वह्नयः। "नित् इत्यनुवृत्तौ
'वहिश्रि' इत्यादिना नि प्रत्ययः॥ आभजन्त। पादादित्वात्
अनिघातः। सुकृत्यया। "विभाषा कृवृषोः" (पा.सू. ३।१।१२०)
इति कृञः कर्मणि क्यप्। शोभनं कृत्यं यस्याः भजनक्रियायाः
सा सुकृत्या। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा
"नञ्सुभ्याम्" इति पदान्तोदात्तत्वम्। ननु कृत्यशब्दे क्यपः
पित्त्वेनानुदात्तत्वात् धातुस्वरेण आद्युदात्तः। ततश्च-
"आद्युदात्तं द्व्यच्छन्दसि" (पा.सू. ६।२।११९) इत्यनेन आद्युदा-
त्तत्वेन भवितव्यम्। तेनहि पुरस्तादपवादेन परमपि "नञ्सुभ्याम्"
इत्युत्तरपदान्तोदात्तत्वं बाध्यते इत्युक्तम्॥

ङान्तर्हि "कृत्यल्युटो बहुलम्" (पा.सू. ३।३।११३) इति स्त्रियां भावे क्यप्प्रत्ययान्तः कृत्या शब्दः । क्यपः पित्त्वेऽपि अस्येन उदात्तत्वम् । प्रातिपदिकस्यापि कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । आगमः "कर्षात्वतः" (पा.सू. ६।१।१५९) इत्यन्तोदात्तः । यतिस्य... इत्यर्थे "अदाविवहतश्च परत्वमौ" (पा.सू. ६।१।१९१) इत्ययं । तस्य ह्रस्वादेशः । प्रत्ययस्वरश्च ॥२॥

२५

ऋभुदेवताकं द्वितीयं सूक्तम्

कुत्सऋषिः (ऋक्सं. मं. १।११०।१-९)

"ततं मे अपः तु" (ऋ. सू.)

॥ प्रथमा ऋक् ॥

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते ।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥

पदपाठः ॥ उचथाय । शस्यते ॥

ततम् । मे । अपः । तत् । ऊँ इति । तायते । पुनरिति । स्वादिष्ठा । धीतिः ।
अयम् । समुद्रः । इह । विश्वऽदेव्यः । स्वाहाऽकृतस्य । सम् । ऊँ इति । तृप्णुत । ऋभवः ॥ १५

व्याख्या - हे ऋभवः मे मम अपः अग्निष्टोमादिरूपं कर्म ततम् विस्तारितम् बहुशः पूर्वमनुष्ठितम् तदु तदेव पुनः तायते विस्तार्यते अनुष्ठीयते इत्यर्थः । तत्र स्वादिष्ठा स्वादुतमा अतिशयेन प्रीतिकरी धीतिः स्तुतिश्च उचथाय स्तुत्याय शस्यते पठ्यते । अपि च इह अस्मिन् आगे समुद्रः समुन्दनशीलः अयं सोमरसः विश्वदेव्यः सर्वेभ्यो देवेभ्यः पर्याप्तः यथा भवति तथा सम्पादितः । तस्य स्वाहाकृतस्य स्वाहाकारेण अग्नौ प्रक्षिप्तस्य सोमस्य पानेन समु तृप्णुत सम्यगेव तृप्ता भवत ।

ततम् "तनु विस्तारे" निष्ठायाम् "यस्य विभाषा" इति इट्प्रतिषेधः । "अनुदात्तोपदेश" इत्यादिना अनुनासिकलोपः । अपः "आप् व्याप्तौ" "आपः कर्माख्यायां ह्रस्वो नुट् च वा" इति असुन् धातोर्ह्रस्वश्च ॥

तायते। "तनोतेर्यकि" (पा.सू. ६।४।४४) इति आ लम्। स्वादिष्ठा न

स्वादु शब्दात् अतिशायनिक इष्ठन्। "टेः" इति टिलोपः।

आपयः। "आप्लृ व्याप्तौ" औणादिकः अथ इन् प्रत्ययः।

"वचि, स्वपि" इत्यादिना सम्प्रसारणम्। सुन्वन्तः "उन्दी क्लेदने"

... इत्यादिना ... "अनिदिताम्" इति नलोपः।

विश्वदेव्यः। देवशब्दात् ... "छन्दसि च" इति य प्रत्ययः।

विश्वे सर्वे देवा यस्मिन् सोमे। "बहुव्रीहौ विश्वं संज्ञायाम्"

इति स्वरेण असंज्ञायामपि पूर्वपदान्तोदात्तत्वम्।

स्वाकृतस्य। आङ् शब्दस्य उपसर्गत्वेन गतित्वात्

(पा.सू. १।४।६१) "गतिरनन्तरः" इति पूर्वपद प्रकृतिस्वरत्वम्।

तृप्णुव। "तृप प्रीणने" "स्वादिभ्यः श्नुः" ... इत्यनेन

"संहितायाम्" ... इति प्रकृतिभावः।

॥ द्वितीया ऋक् ॥

आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम केचिदापयः।

सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम्॥

~~पदपाठः~~ अन्वयः॥

आ। भोगयम्। प्र। यत्। इच्छन्तः। ऐतन। अपाकाः। प्राञ्चः। मम। केचित्।

सौधन्वनासः। चरितस्य। भूमना। आगच्छत। सवितुः। दाशुषः। गृहम्॥

व्याख्या –

हे ऋभवः अपाकाः परिपक्वज्ञानाः प्रत्नाः पूर्वकालीनाः मम आपयः प्रापयितारो महर्षेः भ्रातरः केचित् एवंभूताः ये यूयं आभोगयं उपभोग्यं सोमं इच्छन्तः यत् यदा प्र ऐतन तपश्चरितुं अरण्यं गतवन्तः। ऋभवो हि सुधन्वनः आङ्गिरसस्य पुत्राः। तदुक्तं यास्केन– "ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः" (नि० ११।२।१६) इत्येतेन कुत्सोऽपि आङ्गिरसः अतः तेन महर्षिणा भ्रातरः इत्युक्ताः। हे सौधन्वनासः सुधन्वनः पुत्राः तदानीं चरितस्य समुपार्जितस्य तपसः भूम्ना भूम्ना बाहुल्येन दाशुषः हवींषि दत्तवतः सवितुः सोमाभिषवं कुर्वतो यजमानस्य सम्बन्धिनं गृहम्। आगच्छत। तपःफलभूतसोमपानं कृतवन्तः यूयं आगतवन्तः। यद्वा दाशुषः सवितुः सकाशात् युष्मभ्यं अमृतत्वं अलभत ऋभुभ्यः सोमपानं दत्तवन्तः। सवितुर्गृहं निवासस्थानं तृतीयसवनं गच्छत प्राप्तवन्तः। एतत् सर्वं "आश्विं शंसति" (ऐ० ब्रा० ३।३।३०) इत्यादौ विस्पष्टं प्रपञ्चितम्॥

आभोगयम्। आ समन्तात् भोगः आभोगः। तदर्हं आभोगयः। "छन्दसि च" इति यः। यस्य इति लोपाभावश्छान्दसः।

अल्पयेन प्रत्ययात् पूर्वस्योदात्तत्वम् [illegible]

यद्वा आ-ङ्-पूर्वात् भुजेः औणादिकः कनिन् प्रत्ययः।

[illegible] च। अपि अल्पयोनमुपमा। ऐतन। "इण् गतौ"

[illegible] मध्यम बहुवचनस्य [illegible] तादेशः "तप्तनप्-

नथनाश्च" इति [illegible] आ [illegible]

आदयः। [illegible] प्रत्ययः [illegible]

[illegible]

इति [illegible] पूर्वकस्य विशे-

[illegible]

तृतीया ऋक्

तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन।

त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम्॥ ३॥

पदपाठः

तत्। सविता। वः। अमृतऽत्वम्। आ। असुवत्। अगोह्यम्। यत्। श्रवयन्तः। ऐतन॥

त्यम्। चित्। चमसम्। असुरस्य। भक्षणम्। एकम्। सन्तम्।

अकृणुत। चतुःऽवयम्॥ ३॥

हे ऋभवः तत् तदानीं सविता सर्वस्य प्रेरको देवो वः
युष्माकम् अमृतत्वम् देवत्वम् आसुवत् आभिमुख्येन
प्रेरितवान् दत्तवान् इत्यर्थः॥ यत् यदा यूयं अगोह्यम् गूहितुं
अशक्यम् सर्वैः दृश्यमानं सवितारं श्रवयन्तः अपेक्षितं सोम-
पानं विज्ञापयन्तः सन्तः ऐतन आगच्छत तदानीमिति
पूर्वेण अन्वयः। यस्मात् यूयं देवैः ज्ञापिताः सन्तः असुरस्य
त्वष्टुः सम्बन्धिनम्। तेन निर्मितमित्यर्थः। भक्षणं सोमपान-
साधनं त्यं तं चमसं एकं चित् असहायमेव सन्तं चतुर्वयम्
चतुर्व्यूहं अकृणुत कृतवन्तः त्वष्ट्रा दैवत्वष्ट्रा कृतं चमसं
होमसाधनं हि मुख्यमेकं चतुष्टयरूपेण ऋभवः कृतवन्तः।
इत्यर्थः॥ आसुवत्। "षू प्रेरणे" तौदादिकः। श्रावयन्तः।
"श्रु श्रवणे" इकारस्य वृद्ध्या आवश्यक। ऐतन। लङि मध्यम-
पुरुषबहुवचनस्य तादेशे "तप्तनप्तनथनाश्च" इति तनबादेशः।
भक्षणं भक्ष्यते अनेन इति करणे ल्युट्। अकृणुत। "कृवि हिंसाकरणयोश्च"।
लङि मध्यमबहुवचने "धिन्विकृण्व्योर च" इति उप्रत्ययः।
चतुर्वयम्। वयाः अवयवाः। चत्वारो वयाः अवयवा यस्य स तथोक्तः।

चतुर्थी ऋक्

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः ।
सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ॥४॥

॥ पदपाठः ॥

विष्ट्वी । शमी । तरणिऽत्वेन । वाघतः । मर्तासः । सन्तः । अमृतऽत्वम् । आनशुः ॥
सौधन्वनाः । ऋभवः । सूरऽचक्षसः । संवत्सरे । सम् । अपृच्यन्त धीतिऽभिः ॥४॥

भाष्यम् - वाघतः । ऋत्विङ्नामैतत् अत्र सामर्थ्यात् वोढारो लक्ष्यन्ते, हविर्भिः देवानृभवः शम्या । कर्मणैव वा याग-दानादीनि कर्माणि अन्यान्यपि । "एकं चमसं चतुरः कृणोतन" (ऋ० सं० १।१६१।२) इत्यादिना देवैः वचनानि कर्माणि वा तरणित्वेन । तरणिरिति क्षिप्रनाम । क्षिप्रत्वेन शैघ्र्येण विष्ट्वी । व्याप्य तत् कर्म तथा व्याप्य क्रिया फलं आप्य कृत्वेत्यर्थः । तानि कर्माणि कृत्वा मर्तासः मनुष्याः अपि सन्तः अमृतत्वं देवत्वं आनशुः अश्नुविरे । कृतैः कर्मभिर्लब्धे देवत्वं प्राप्य च सौधन्वनाः सुधन्वनः पुत्राः सूरचक्षसः सूर्यरश्मिप्रकाशाः सूर्यसदृशप्रज्ञाना वा ते ऋभवः संवत्सरे संवत्सरावयवभूते वसन्तादिकाले अनुष्ठेयैः धीतिभिः अग्निहोत्रादिकर्मभिः समपृच्यन्त । संयुक्ता अभवन् । हविर्भागार्हाः बभूवुरित्यर्थः ॥

अत्र निरुक्तम् — ऋभव। कर्माणि प्रविदितः प्रकेन बोटा। से
मेधाविनो वा मतविन्दः सन्तोऽमृतत्वमानशिरे सौधन्वना
ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपद्यन्त
ऋतिभिः कर्मभिः ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिर
सस्य त्रयः पुत्रा बभूवुः॥ (नि० ११।१६) इति॥
विभ्वीति। विभ्व व्याप्तौ॥ "स्नात्व्यादयश्च" (पा० ७।१।४९)
इति क्त्वाप्रत्ययस्य ईकारान्तादेशः। शमी। सुभ्यं सुनुभुं हृदि।
शस्तोत्नुभुः आनशुः। अशू व्याप्तौ "अभ्यासस्य पार्सौ पदमप
"अश्नोतेश्च" इति अभ्यासात उत्तरस्य नुडागमः। अपृच्यन्त।
"पृची संपर्के"। कर्तरि लङ्॥ ४॥

॥ पञ्चमी ऋक्॥

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम्।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः॥ ५॥

पदपाठः — जेहमानम्।
क्षेत्रम्ऽइव। वि। ममुः। तेजनेन। ~~अमर्त्ये~~ ऽएकम्। पात्रम्। ऋभवः।
उपऽस्तुताः। उपऽमम्। नाधमानाः। अमर्त्येषु। श्रवः। इच्छमानाः॥
५५५

भाष्यम् – उपस्तुताः संसिसृथैः ऋत्विग्भिः स्तुताः ऋभवः जेहमानं
होमक्रियां प्रति प्रयतमानानां ॐ का अस्मदीयाः यज्ञं
पानसाधनाय त्वष्ट्रा निर्मितं चमसं यत् दण्डेनाक्षेत्रमिव
भूमिमिव वृजनेन तीक्ष्णेन शस्त्रेण चमसाः चतुष्प्रसरणेन
कर्तुं वि ममुः विशेषेण मानं कृतवन्तः। किमिच्छन्तः इं
उपमां सर्वेषामुपमानभूतं प्रशस्तं सोमलक्षणं सुम्नम्
इच्छमानाः इच्छन्तः नाधमानाः याचमानाः। तदेव
विवृणोति। आमत्सु भूरयोर हितेषु देवेषु मध्ये श्रवः
हविर्लक्षणमन्नं इच्छमानाः इच्छन्तः। देवैः सह सोमपानं
कामयमानाः तन्नु ऋभवः चतुरश्चमसान् अकार्षुरित्यर्थः।
ममुः। "माङ् माने शब्दे च" अस्मात् लिट् परस्मैपदम्।
तेजनेन। "अणोऽप्रगृह्यस्यानुनासिकः" (पा.सू. ८.४.५७)
इति अवसाने अत्ययेन अकारस्य आनुनासिक्यम्।
ईषा। अक्षस्य दितवात् प्रकृतिभावः। जेहमानम् "वेहृ जेहृ-
बाहृ प्रयत्ने"। भौवादिकः। अनुदात्तेत्वात्। आत्मनेपदम्।
उपस्तुतासः। "गतिरनन्तरः" इति गतेः प्रकृतिस्वरत्वम्।
उपममम्। "माङ् माने"। "आतश्चोपसर्गे" इति कप्रत्ययः।
इच्छमानाः। व्यत्ययेन आत्मनेपदम्।

॥ श्री ॥

आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ॥
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन् दिवो रजः ॥ ६ ॥

॥ पदपाठः ॥ (विद्मना ॥

आ । मनीषाम् । अन्तरिक्षस्य । नृऽभ्यः । स्रुचाऽइव । घृतम् । जुहवाम ।
तरणिऽत्वा । ये । पितुः । अस्य । सश्चिरे । ऋभवः । वाजम् । अरुहन् । दिवः ।
(रजः ॥ ६ ॥

